# E-Text

पत्रस्य नाम : लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्)

पत्रसंख्या : V

पाठ्यांशनाम : स्थानिवदादेशोऽनल्विधौ - 4

पाठ्यांशसंख्या : 7

पाठ्यांशस्य मुख्याः अंशाः :

1) अनुबन्धकार्ये अनल्विधाविति निषेधो न।
2) अचः परस्मिन् पूर्वविधौ।
3) पदकृत्यविचारः।
4) भावाभावयोरुभयोरप्यतिदेशः।
5) स्थानिभूतादचः पूर्वस्येति कथम्।
6) पूर्वविधौ इत्यत्र कोऽर्थः।

विषयसूची


1.0 : उपोद्घातः

1.1 : अनुबन्धकार्ये अनल्विधाविति निषेधो न

2.0 : अचः परस्मिन् पूर्वविधौ

2.1 : पदकृत्यविचारः

2.2 : भावाभावयोरुभयोरप्यतिदेशः

2.3 : स्थानिभूतादचः पूर्वस्येति कथम्

2.4 : पूर्वविधौ इत्यत्र कोऽर्थः


ePathshala पाठशाला A Gateway to all Post Graduate Courses

**1.0 उपोद्घातः**

पूर्वस्मिन् पाठे स्थानिवदादेशोऽनल्विधौ इति सूत्रे विधिग्रहणस्य प्रयोजनमुक्तम्। सामान्यातिदेशे विशेषानतिदेश इति लोकन्यायो नात्राश्रीयते, किन्तु विशेषातिदेशोप्यस्ति, तथा च क्त्वाप्रत्ययादिनिष्ठवलादित्वादिविशेषधर्माणामपि स्थानिवत्सूत्रेण ल्यबाद्यादेशेषु अतिदेशे सति प्रपठ्येत्यादौ आर्धधातुकस्येड्वलादेरिति इडागमः प्राप्नोतीति तद्वारणाय अनल्विधावित्यत्र विधिग्रहणमुपयुज्यत इत्युक्तम्। विशेषातिदेशोऽस्तीत्यत्र न ल्यपि इति लिङ्गमित्यपि तत्रोक्तम्। इदानीं किति ङिति इत्येवम् अनुबन्धविशिष्टनिर्देशेन कृतानां विधीनाम् अल्विधित्वमस्ति वेत्यादि विचार्यते।

**1.1 अनुबन्धकार्ये अनल्विधाविति निषेधो न**

**शेखरे - अनुबन्धकार्ये तु अनल्विधाविति निषेधो न, अनुबन्धानाम् अनेकान्तत्वात्।**

(न ल्यपीति लिङ्गात् विशेषा अप्यतिदिश्यन्ते) इति स्वीकृतमिति प्रतिपादितं प्राक्। विशेषा अतिदिश्यन्ते इति स्वीकारेऽपि क्त्वाप्रत्ययगतकित्वधर्माश्रयविधेः अल्विधित्वात् अनल्विधाविति निषेधेनैव ईत्ववारणं सम्भवति न ल्यपीति सूत्रं पुनरपि व्यर्थमेव किल - इत्याक्षेपे समाधानमुच्यते - अनुबन्धकार्ये इत्यादिना। अनुबन्धा अनेकान्ताः, अनुबन्धा एकान्ता इति पक्षद्वयमस्ति। अनुबन्धा नाम इत्संज्ञकवर्णाः। तेषां तद्घटितसमुदायं प्रति अवयवत्वं नास्ति -इति अनेकान्ता इति पक्षस्यार्थः। अस्मिन् पक्षे ककारस्य स्थान्यवयवत्वाभावात्, तन्निष्ठेत्संज्ञारूपधर्मस्य स्थान्यवयवाल्वृत्तित्वाभावात् अनल्विधाविति निषेधो न प्रवर्तते।

ननु स्थान्यवयवत्वाभावेऽपि स्थानिसम्बन्धित्वसद्भावात् अनुबन्धस्य अल्त्वाच्च प्रवर्तत एव अनल्विधाविति निषेध इति चेदुच्यते - वस्तुतः अनुबन्धा

एकान्ता इत्येव सिद्धान्तः। तथाच ककारानुबन्धस्य स्थान्यवयवत्वमेव। परन्तु अनुबन्धानाम् अल्त्वमेव नास्ति।

**एकान्तत्वेपि शिद्ग्रहणेन तेषामल्व्यवहाराभावज्ञापनात्। नानुबन्धकृतमनेकाल्त्वम् इति ज्ञापयतीति भाष्ये अल्त्वव्यवहाराभावबोधनद्वारा इति शेषः।**

यदि अनुबन्धानाम् अल्त्वेन गणना स्यात् तर्हि अनेकाल्शित् सर्वस्य इति सूत्रे अनेकाल्ग्रहणेनैव इश् इत्यादौ अनेकाल्त्वे सिद्धे शिद्ग्रहणं व्यर्थं स्यात्। तथाच शिद्ग्रहणादेव ज्ञायते अनुबन्धानाम् अल्व्यवहारो नास्तीति।

ननु भाष्ये शिद्ग्रहणं नानुबन्धकृतमनेकाल्त्वम् इति परिभाषाया ज्ञापकमिति कथितं, तदनेन विरुध्यते - इति चेन्न। तत्र (शिद्ग्रहणम् अनुबन्धानाम् अल्त्वव्यवहाराभावद्वारा नानुबन्धकृतमनेकाल्त्वमिति ज्ञापयति) इत्यर्थः। तथाच नास्ति विरोधः।

**ध्वनितञ्चेदं क्ङिति च, गाङ् लिटि, हलः श्नः इति सूत्रेषु भाष्ये। तत्र आद्ये यासुटः ङिद्वचनाद् ङिदादेशा ङितो न इति ज्ञाप्यत इत्युक्तम्।**

क्ङिति च इत्यत्र भाष्ये यासुटः ङिद्वचनाद् ङिदादेशा ङितो न इति ज्ञाप्यत इत्युक्तम्। तदाशयः - चिधातोः लङि उत्तमपुरुषैकवचने अचिनु मिप्। "तस्थस्थमिपां तान्तन्तामः" इति सूत्रेण अमादेशे अचिनु अम्। लकारस्य ङित्वाद् आदेशेषु स्थानिवद्भावे सति अमः ङित्वेन गुणनिषेधः प्राप्नोति। परन्तु "यासुट् परस्मैपदेषूदात्तो ङिच्च" इति सूत्रे ङिच्च इति कथनात् ज्ञायते ङिदादेशा ङितो न भवन्तीति। तथाहि - यदि ङिदादेशो ङित् स्यात् तर्हि लिङः स्थाने कृतस्य तिङः ङित्वे सति तदवयवे यासुडागमे ङिद्वचनं व्यर्थं स्यात्। तथाच अचिनु अम् इत्यत्रापि अमः ङित्वाभावात् गुणः सिध्यति।

यदि अनुबन्धविषये अनल्विधाविति निषेधः स्यात् तर्हि अचिनु अम् इत्यत्र स्थानिनिष्ठङित्वधर्माश्रयगुणनिषेधे कर्तव्ये स्थानिवद्भावनिषेधात् गुणाप्राप्तौ ज्ञापकाश्रयणं व्यर्थं स्यात्।

**द्वितीये गाङो ङित्वस्य सानुबन्धकादेशे इत्कार्याभावज्ञापकता उक्ता।**

गाङ् लिटि इति सूत्रेण इङः धातोः गाङादेशो विधीयते। स्थानिवद्भावेन गाङादेशस्य ङित्कार्याणि सिध्यन्ति चेत् किमर्थम् आदेशे ङित्करणम्। अतः आदेशे ङित्करणमेव ज्ञापयति सानुबन्धकस्य आदेशे स्थानिन इतमाश्रित्य कार्यणि न कर्तव्यानीति। परन्तु - यदि अनुबन्धानाम् अल्त्वव्यवहारो वार्तिककृत्सम्मतः तर्हि अनल्विधावित्यनेनैव प्राप्तस्य इत्कार्याभावस्य साधनाय आदेशे ङित्करणमिति उक्तं स्यात्। परन्तु ज्ञापकपरतया वर्णितम्। तेन ज्ञायते अनुबन्धानाम् अल्त्वेन गणना नास्तीति।

**शेखरे - तिबाद्यादेशेषु पित्वासिद्ध्या दूषितं च ज्ञापकम्।**

(सानुबन्धकस्य आदेशेषु इत्कार्यं नास्ति) इत्यस्यार्थस्य ज्ञापकं गाङो ङित्वमिति च मतं तिरस्कृतं भाष्ये एव। तथाहि - यदि सानुबन्धकस्य आदेशेषु इत्कार्यं न स्यात् तर्हि तिप् सिप् मिप् इत्येषाम् आदेशेषु पित्वप्रयुक्तकार्याणि न सिध्येयुः। तस्मात् ज्ञापकत्वं न युक्तम्।

**अन्त्ये शानचः शित्वस्य सार्वधातुकादेशे अनुबन्धास्थानिवत्वज्ञापकत्वमुक्तम्। उक्तदूषणैरेव दूषितञ्च। अन्यथा अनल्विधाविति निषेधेन तत्त्वाप्राप्त्या ज्ञापकत्वासङ्गतिः, तिबाद्यादेशेषु पित्त्वाद्यसिद्धिश्चेति बोध्यम्।**

"हलः श्नः शानज् हौ" इत्यत्र शानजादेशे शित्करणं किमर्थम्। स्थानिनः श्नाप्रत्ययस्य शित्वादेव निर्वाहः सिध्यति खलु। इति प्रश्नः। तत्रोक्तं -

सार्वधातुकानामादेशेषु स्थानिवद्भावेन तत्तदनुबन्धवत्त्वं न भवति- इत्यत्र ज्ञापकं शित्करणमिति। इदमपि ज्ञापकत्वमसङ्गतम्, अनुबन्धानाम् अल्त्वव्यवहारोऽस्ति चेत् अनल्विधावित्यनेनैव तत्तदनुबन्धवत्त्वाभावसिद्धेः। भाष्ये तिरस्कृतं च ज्ञापकत्व्। तथाहि -यदि सार्वधातुकानामादेशेषु स्थानिवद्भावेन तत्तदनुबन्धवत्त्वं न स्यात् तर्हि तिप् सिप् मिप् इत्येषाम् आदेशेषु पित्वप्रयुक्तकार्याणि न सिध्येयुः। तस्मात् ज्ञापकत्वं न युक्तम्।

## 2.0 अचः परस्मिन् पूर्वविधौ

**शेखरे - आदेशग्रहणमनुवर्तते। तदनुरोधादच इति स्थानषष्ठी, परस्मिन्नित्यादेश-विशेषणम्। तदाह - परनिमित्त इत्यादि।**

स्थानिवदादेश इति वचनेन स्थानिवद्भावं विधाय तदा क्वचिद्भवतो दोषान् परिहर्तुम् अनल्विधौ इत्यारब्धम्। अनल्विधाविति वचने सति सम्भवद्दोषपरिहाराय अचः परस्मिन् पूर्वविधौ इत्यारभ्यते। आदेशः स्थानिवदित्यनुवर्तते। अच इति आदेशं प्रति विशेषणम्, अचः आदेशः इति। अचः स्थाने आदेश इत्यर्थः। षष्ठी स्थानेयोगा इति परिभाषानुरोधेन। परस्मिन्नित्यपि आदेशं प्रति विशेषणम्- परस्मिन् य आदेश इति। परनिमित्तक आदेश इत्यर्थः। तथाच - परं निमित्तीकृत्य अचः स्थाने कृतः आदेशः पूर्वविधौ कर्तव्ये स्थानिवत् स्यादिति सूत्रार्थः। उदाहरणम् - पट्व्या मृद्व्या पटयति लघयति इत्यादि। यदा पदावधिकान्वाख्यानमास्थीयते, पटुशब्दात् वोतोगुणवचनादित्यनेन स्त्रियां ङीषि ततः तृतीयैकवचने पटु ई आ इति पदसंज्ञके समुदाये प्रक्रिया आरभ्यते तदा नित्यत्वात् प्रथमम् ईकारस्य यणादेशे पटु य् आ इति जाते उकारस्य अच्परकत्वाभावात् यणादेशो न सिध्यति। परनिमित्तक ईकारयणादेशः पूर्वस्य उकारस्य यणादेशे कर्तव्ये स्थानिवत् स्यात् - इति

स्थानिवद्भावेन अच्परकत्वात् उकारस्य यणादेशे पट् व् य् आ - पट्व्या इति सिध्यति।

पटयतीत्यत्र पटुशब्दात् पटुं करोति पटुमाचष्टे इत्याद्यर्थे प्रातिपदिकाद् धात्वर्थे "बहुलमिष्ठवच्च" इति चुराद्यन्तर्गतगणसूत्रेण णिचि ततः लटि तिपि शपि च - पटु णिच् शप् तिप्। इष्ठवच्च इत्युक्तत्वात् इष्ठन्प्रत्यये यथा प्रक्रिया तथैव णावपि प्रक्रिया। ततश्च टेः इति सूत्रेण उकारस्य लोपे पट् णि अ ति। इदानीं पट् इति अकारोपधः सञ्जातः। णिचं निमित्तीकृत्य कृतस्य उकारलोपस्य स्थानिवद्भावे तु सति अकारस्य उपधात्वं न भवति। तथाच अत उपधाया इति वृद्धिः न भविष्यति, पटयतीति इष्टं सिध्यति। एतत्सूत्राभावे तु अकारस्य उपधात्वात् स्थानिवदादेशः इति पूर्वसूत्रेण अशास्त्रीये कार्ये अतिदेशासिद्ध्या, वृद्धौ पाटयतीत्यनिष्टापत्तिः।

**शेखरे - अच एवादेश इत्यर्थः। तेन मरुतमाचष्टे मारयतीत्यादौ वृद्धिः।**

अचः स्थाने य आदेशः परं निमित्तीकृत्य कृतः स स्थानिवदित्यत्र अचः स्थाने आदेशः इत्यस्य अचः एव स्थाने कृत आदेश इत्यर्थः स्वीकार्यः, लक्ष्यानुरोधात्। तथाहि- मरुत् इति प्रातिपदिकात् (प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च) इति धातुपाठस्थगणसूत्रेण (तत्करोति तदाचष्टे) इत्यर्थे णिचि तस्य च इष्ठवद्भावात् टेः इति सूत्रेण टेः लोपे मर् णिच् इति। अत उपधायाः इति सूत्रेण वृद्धौ मार् इ इति स्थिते तिपि शपि गुणे अयादेशे मारयति इति सिध्यति। यद्यत्र परनिमित्तकः उकारतकारयोः समुदायस्य लोपादेशः उकारस्यापि स्थाने कृत आदेश इति मत्वा स्थानिवत् स्यात् तर्हि मर् इत्यत्र अकारस्य उपधात्वाभावात् वृद्धिः न सिध्येत्।

**शेखरे - अत्र सूत्रे प्रयोगे योऽच् तत्स्थानिक इत्यर्थः। न तु सूत्रे स्थानित्वेनोपात्ताच्स्थानिक इत्यर्थः। तेन णिलोपादेरनेन स्थानिवत्त्वं सिध्यति। अत एव चङ्परनिर्ह्रासे ण्यन्तात् णिचि अवीवददित्यादिसिध्यर्थो निषेधः सार्थकः।**

वदधातोः णिचि वादयति इति रूपम्। तस्य लुङि अवीवदत् इति रूपम्। वादयन्तं प्रयोजयति इत्यर्थे ण्यन्तात् पुनः णिचि वाद् णिच् णिच्। ततो लटि वादयतीत्येव रूपम्। ततो लुङि, "च्लि लुङि" इति सूत्रेण च्लौ, "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" इति सूत्रेण च्लेः चङि णेरनिटि इति सूत्रेण उभयोरपि णिचोः क्रमेण लोपे (वाद् चङ्)। णौ चङ्युपधाया ह्रस्व इति सूत्रेण उपधाह्रस्वे अडागमे, तिपि इकारलोपे (चङि) इति सूत्रेण द्वित्वे अभ्यासकार्ये अवीवदत् इत्येव रूपमिष्यते।

अत्र प्रथमणिचो लोपस्य अचः परस्मिन् पूर्वविधौ इत्यनेन स्थानिवद्भावो भवति वा इति आशङ्का। यदि एरनिटि इति सूत्रं स्यात् तर्हि (इकारस्य स्थाने लोपः) इति कृत्वा अचः परस्मिन्निति प्रवर्तते। परन्तु णेः लोप इत्युक्तम्। णिलोपे कृते फलतः यद्यपि इकारस्यैव लोपः तथापि णेः लोप इत्युक्तत्वात् अच्त्वेन अचं गृहीत्वा आदेशस्य अविधानात् अचः परस्मिन्नित्यस्य कथं प्रवृत्तिः। तथाच अ वाद् चङ् त् इत्यवस्थायाम् उपधाह्रस्वाभावे द्वित्वे अभ्यासकार्येषु अववादत् इत्यनिष्टापत्तिः।

अत्रोच्यते - न पदान्तसूत्रे क्विलुगुधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानमित्युक्तं वार्तिककृता। अवीवदद् वीणां देवदत्तेन यज्ञदत्त इत्यादौ अचः परस्मिन् इत्यनेन स्थानिवत्त्वात् (णौ चङ्युपधाया ह्रस्वः) इति सूत्रेण विहित उपधाह्रस्वो न सिध्येत्, अतः तत्सिध्यर्थं चङ्परनिर्ह्रासे स्थानिवद्भावप्रतिषेधो वक्तव्य इति तत्रोच्यते। यदि अच्त्वेन अचं गृहीत्वा विहित आदेश एव स्थानिवत् स्यात् तर्हि वार्तिकमनावस्यकम्। अतः वार्तिकादेव ज्ञायते - आदेशविधायकसूत्रे स्थानित्वेन उपात्ताच्स्थानिक एव आदेश इति निर्बन्धो नास्तीति।

**2.1 पदकृत्यविचारः**

**शेखरे - अच इति किम्। आगत्य। मलोपस्य स्थानिवत्त्वात् ह्रस्वस्य इति तुक् न स्यात्।**

सूत्रे अच इत्यस्याभावे, परस्मिन् पूर्वविधौ इति चेत् परनिमित्तकः आदेशः स्थानिवत् स्यादित्यर्थः स्यात्। तथाच अच्स्थानिको वा हल्स्थानिको वा भवतु, परनिमित्तकश्चेत् पूर्वविधौ कर्तव्ये स्थानिवद्भावः प्राप्नोति। यथा - आङ् गम् ल्यप् इति स्थिते "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति, वा ल्यपि" इति सूत्रेण मकारलोपे आ ग ल्यप् इति जाते ह्रस्वस्य पिति कृति तुक् इत्यनेन तुगागम इष्यते। परन्तु यदि मकारस्य लोपादेशः स्थानिवत् स्यात् तर्हि तेन व्यवधानात् तुगागमो न सिध्येत्। सूत्रे अच इति सत्वे तु हल्स्थानिकस्य आदेशस्य स्थानिवद्भावाभावान्न दोषः।

**शेखरे - परस्मिन्निति किम्। युवजानिः, निङः स्थानिवत्त्वेन यलोपो न स्यादिति।**

युवतिः जाया यस्य स इत्यर्थे अनेकमन्यपदार्थे इति सूत्रेण बहुव्रीहौ युवति सु जाया सु इति स्थिते सुपो धातुप्रातिपदिकयोः इति सुब्लुकि, जायाया निङ् इति सूत्रेण निङादेशे पुंवद्भावे युवन् जाय् निङ् इति जाते नलोपः प्रातिपदिकान्तस्येति नलोपे लोपो व्योर्वलि इति सूत्रेण यलोपे युवजानि - युवजानिः। अत्र निङादेशो न परनिमित्तकः। यदि सूत्रे परस्मिन्निति न स्यात्, अचः पूर्वविधौ इत्येव स्यात् तर्हि आकारस्य स्थाने कृतस्य निङादेशस्य स्थानिवद्भावे यलोपो न सिध्येत्। परस्मिन्निति सूत्रे वर्तते चेत् निङादेशस्य परनिमित्तकत्वाभावादेव अचः परस्मिन्नित्यस्य अप्रवृत्तिः।

**शेखरे - पूर्वविधाविति किम्। नैधेयः। निपूर्वाद् धाञः किप्रत्यये आतो लोपे तस्य स्थानिवद्भावात् त्र्यच्त्वव्यपदेशविरोधात् स्वाश्रयद्व्यच्त्वनिवृत्तौ ढगनापत्तेः।**

निपूर्वकात् डु धाञ् धारणपोषणयोरिति "धातोः उपसर्गे घोः किः" इति सूत्रेण किप्रत्यये नि धा कि इति जाते "आतो लोप इटि च" इत्यनेन आकारलोपे निध् इ -

निधिः। ततः द्व्यचः, इतश्चानिञः इति सूत्रेण ढकि, तस्य एयादेशे यस्येति च इति इकारलोपे आदिवृद्धौ नैध् एय - नैधेयः इति सिध्यति। इतश्चानिञ इत्यनेन विहितो ढक् न पूर्वविधिः। तथाच सूत्रे पूर्वविधावित्यस्याभावे अचः परस्मिन् इत्येव सूत्रं स्यात्, तदा परनिमित्तकः अच आदेशः स्थानिवत् स्यात् - इत्येवार्थे, ढकि कर्तव्येपि स्थानिवद्भावः स्यात्। किप्रत्ययनिमित्तकस्य आतो लोपस्य स्थानिवद्भावे (निध् आ इ) इत्यस्य प्रातिपदिकस्य इदानीं त्र्यच्त्वात् द्व्यच इतश्चानिञ इत्यनेन विहितो ढक् न सिध्येत्।

ननु स्थानिवद्भावेन त्र्यच्त्वव्यपदेशेऽपि स्वाश्रयं द्व्यच्त्वमाश्रित्य ढक् कर्तुं शक्यत इति चेन्न। अतिदिश्यमानत्र्यच्त्वधर्मविरुद्धस्वाश्रयद्व्यच्त्वाश्रितकार्यस्य अभाव इति सिद्धान्तात्। अतः पूर्वविधौ कर्तव्ये एव स्थानिवद्भावः, न तु परत्र विधौ।

### 2.2 भावाभावयोरुभयोरप्यतिदेशः

**शेखरे - अत्र स्थानिनि सति यद् भवति तदादेशेऽपि भवति, स्थानिनि यन्न भवति तदादेशेऽपि नेति भावाभावयोरुभयोरपि अतिदेशः। तत्र भावोदाहरणं निगाल्यते इति। अन्त्योदाहरणं पटयतीत्यादि। स्थानिनिमित्तकं भवति, आदेशनिमित्तकं न - इति च तदर्थः। अदुपधत्वसम्पादनद्वारा लोपनिमित्तिका वृद्धिरित्याहुः।**

सूत्रे अचः, परस्मिन्, पूर्वविधौ -इति सूत्रस्थपदानाम् एकैकस्य अभावे को दोष इति प्रतिपादितम्। इदानीं स्थानिवत् स्यादित्यंशं विशदीकरोति - अत्र स्थानिनीत्यादिना। यथा (यवानां विषये मद्राः उशीनरवत्) इत्युक्ते (यवानां भावे विषये मद्राणाम् उशीनरतुल्यता) इति वा (यवानामभावे विषये मद्राणाम् उशीनरतुल्यता) इति वा वक्तुरभिप्रायो भवितुमर्हति एवं प्रकृतेपि आदेशः स्थानिवदित्यतः पूर्वविधिं प्रति निमित्तत्वे वा निमित्तत्वाभावे वा विषये आदेशस्य

स्थानितुल्यता अवगम्यते। यं पूर्वविधिं प्रति स्थानिनो निमित्तत्वं भवितुमर्हति तं प्रत्यादेशस्यापि निमित्तत्वम् अतिदिश्यते, यं पूर्वविधिं प्रति स्थानिनः निमित्तत्वाभावः तं प्रति आदेशस्यापि निमित्तत्वाभावः अतिदिश्यते। यथा पूर्वविधिनिरूपितनिमित्तत्ववान् स्थानी तथा आदेशोऽपि, यथा च पूर्वविधिनिरूपितनिमित्तत्वाभाववान् स्थानी तथा आदेशोऽपि। स्थानिनिष्ठं निमित्तत्वं, स्थानिनिष्ठं निमित्तत्वाभावश्च तत्तत्पूर्वविधिनिरूपितम् आदेशे अतिदिश्यते अचः परस्मिन्नित्यनेन।

तत्र निमित्तत्वभावं प्रति स्थानिवद्भावस्योदाहरणम्- निगाल्यते। दीर्घान्तात् गृधातोः णिच्। अचो ञ्णिति, उरण् रपरः -इति सूत्रेण वृद्धौ गार् णिच्। ग्रो यङि, अचि विभाषा इति सूत्रेण धात्ववयवस्य रेफस्य लत्वे, गाल् णिच्। ततः कर्मणि लटि, सार्वधातुके यक् इति सूत्रेण यकि, लट आत्मनेपदादेशे - गाल् णिच् यक् ते। णेरनिटीति णिलोपे नि गाल् य ते। निगाल्यते। अत्र परनिमित्तकः अच आदेशः णिचो लोपः। पूर्वविधिः लत्वम्। लत्वनिरूपितं निमित्तत्वं णिचि विद्यमानं तदादेशे लोपे अतिदिश्यते। निमित्तत्वाभावं प्रति स्थानिवद्भावस्य पटयतीत्युदाहरणम्। तथाहि - पटुं करोति इति, पटुमाचष्टे इति वा अर्थे पटुशब्दात् प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च इति वचनेन णिचि, णिच इष्ठवद्भावात् टेरिति सूत्रेण टिसंज्ञकस्य उकारस्य लोपे पट् णिच् इत्यवस्थायाम् अत उपधाया इति सूत्रेण वृद्धिः प्राप्नोति। अत्र परनिमित्तकः अच आदेशः उकारलोपः। पूर्वविधिः उपधावृद्धिः। उपधावृद्धिनिरूपितनिमित्तत्वाभावः यथा स्थानिनः उकारस्य, तथा तदादेशस्य लोपस्यापि तन्निरूपितनिमित्तत्वाभाव एव।

एवं निमित्तत्वे निमित्तत्वाभावे च अतिदिश्यमाने किं फलतीति चेत् - स्थानिनिमित्तक एव पूर्वविधिः आदेशे कृतेऽपि भवति, आदेशनिमित्तकः पूर्वविधिः न भवति - इति फलितम्। पटयतीत्यत्र उकारनिमित्तकः उपधावृद्ध्यभाव एव लोपादेशे कृतेऽपि भवति, न तु लोपादेशनिमित्तिका वृद्धिः। ननु उकारस्य वृद्ध्यभावं प्रति कथं निमित्तत्वं, लोपस्य वा कथं वृद्धिं प्रति निमित्तत्वम्। न हि कस्मिन्नपि सूत्रे तयोः तादृशं निमित्तत्वमुच्यते इति चेत्। उच्यते - उकारे सति पकारोत्तरवर्तिनः अकारस्य उपधात्वाभावः, ततश्च अत उपधाया इत्यस्याप्रवृत्तिः। उकारस्य लोपे कृते तु उपधात्वं भवतीति तद्द्वारा वृद्धिसूत्रप्रवृत्तिरिति तावता निमित्तत्वं तदभावश्च।

## 2.3 स्थानिभूतादचः पूर्वस्येति कथम्

**शेखरे- स्थानिभूतादच इति। सूत्रे श्रवणात् व्याख्यानाच्च तस्यैव पूर्वत्वे अवधित्वमिति भावः।**

पूर्वविधौ इत्यत्र पूर्वशब्दश्रवणे अवध्याकाङ्क्षा भवति कस्मात् पूर्वस्य विधाविति। स्थानिनः पूर्वस्य वा आदेशात् पूर्वस्य वा निमित्तात् पूर्वस्य वा अन्यतमात् पूर्वस्य वा -इति जिज्ञासा। स्थानि-आदेश-परशब्दानां सूत्रे श्रुतत्वात् तेष्वेव संशयः। तत्र किरतौ लवने इत्यदिसौत्रनिर्देशानुरोधिव्याख्यानात् लक्ष्यानुरोधिव्याख्यानाच्च स्थान्यवधिकमेव पूर्वत्वमिह स्वीक्रियते। तथाहि - लू अन इति स्थिते सार्वधातुकार्धधातुकयोरिति सूत्रेण गुणे लो अन इति जाते यदि निमित्तात् पूर्वत्वमिह स्यात् तर्हि अवादेशो न सिध्येत्, तथाच लवनमिति अवादेशविशिष्टो निर्देशो नोपपद्येत। वैयाकरण इत्यादिलक्ष्यासिद्धेश्च आदेशावधिकं पूर्वत्वमपि न स्वीक्रियते। तथाहि- आङः वेश्च करणशब्देन क्रमेण समासे वि आकरण इति स्थिते यणादेशे व् य् आकरण इति जाते ततः तद्धिते अण्प्रत्यये व् य् आकरण अण्। अत्र

तद्धितेष्वचामादेः इत्यनेन आदिवृद्धिः आकारस्य प्राप्नोति। परन्तु (न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्) इत्यनेन आदिवृद्धिनिषेधः, ऐजागमश्च भवतः। व् ऐ य् आकरण इति। यदि आदेशावधिकं पूर्वत्वमाश्रीयेत तर्हि परनिमित्तको यकारादेशः स्थानिवत् स्यात् यकारात् पूर्वस्य ऐकारस्य आयादेशे कर्तव्ये, ततश्च आयादेशः प्राप्नुयात्। स्थान्यवधिके पूर्वत्वे स्वीक्रियमाणे तु ऐजागमस्य स्थान्यवस्थायामभावात् स्थानिवद्भावाभावात् न दोषः।

**2.4. पूर्वविधौ इत्यत्र कोऽर्थः**

**शेखरे - पूर्वविधावित्यस्य पूर्वसम्बन्धिन्येव शास्त्रविधेये कर्तव्ये इत्यर्थः। तेन पूर्वपरयोर्विधौ न। तेन आरतुरित्यादौ ऋच्छत्यृताम् इति गुणस्य सवर्णदीर्घे न स्थानिवत्त्वम्।**

पूर्वविधिशब्दस्य - पूर्वस्य विधिः - पूर्वसम्बन्धी विधिरित्यर्थः। स च पूर्वस्यैव विधिः ग्राह्यः, न तु पूर्वपरयोः सम्बन्धी विधिः पूर्वविधित्वेन ग्राह्यः। तथाच एकः पूर्वपरयोः इत्यस्मिन्नधिकारे विहितानामादेशानां पूर्वविधित्वेन ग्रहणं नास्ति। ऋधातोः लिटि, तस्य तसि, परस्मैपदानां णलतुसित्यादिना अतुसि, ऋ अतुस् इति स्थिते लिटि धातोरनभ्यासस्य इति सूत्रेण द्वित्वे ऋऋअतुस्। उरत् इत्यनेन अभ्यासऋवर्णस्य अकारे रपरत्वे हलादिशेषे अ ऋ अतुस्। अत आदेः इत्यनेन दीर्घे आ ऋ अतुस्। ऋच्छत्यृताम् इति गुणे आ अर् अतुस्। इदानीम् अकः सवर्णे दीर्घ इत्यनेन सवर्णदीर्घः कर्तव्यः। यदि पूर्वपरयोः विधिरपि पूर्वविधित्वेन गृह्यते तर्हि अत्र परनिमित्तकस्य गुणादेशस्य स्थानिवद्भावेन ऋकारत्वे सवर्णाच्परकत्वाभावात् दीर्घो न सिध्येत्।